# कक्षा 9 वीं अर्द्ध वार्षिक परीक्षा, 2023-24

## संस्कृत -512 { set-B}

( समय : 03 घण्टे ) ( पूर्णांक :75 )

निर्देशाः- 1. सर्वे प्रश्नाः अनिवार्याः सन्ति ।

2. प्रश्नानां सम्मुखे अंकाः प्रदत्ताः ।

3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि ।

प्र. 1. उचितं विकल्पं चित्वा लिखत— ( 1×6=6 )

(i) 'अनु' उपसर्गस्य उदारणम् अस्ति-

(अ) अवगच्छति (ब) अनुगच्छति (स) गच्छति (द) उपगच्छति

(ii) 'पराजयते' पदे उपसर्गः अस्ति-

(अ) परा (ब) जयते (स) जय (द) यते

(iii) 'गम्' धातोःरुपम् अस्ति -

(अ) पठति (ब) गच्छति (स) हसति (द) वदति

(iv) लङ् लकारस्य उदाहरणं अस्ति -

(अ) भवति (ब) भवेत् (स) भविष्यति (द) अभवत

(v) दृश् धातोःउदाहरणं अस्ति -

(अ) हसति (ब) गच्छति (स) पश्यति (द) भवति

(iv) वर्तमानकाले कः लकारः भवति -

(अ) लङ् (ब) लट् (स) लृट् (द) लोट्

प्र. 2. कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत– ( 1×6=6)

(i) 'रमेशः कुत्र गच्छति' इत्यत्र अव्ययः................. अस्ति। (गच्छति / कुत्र )

(ii) 'सः तत्र क्रीड़ति' इत्यत्र अव्ययः................. अस्ति। ( तत्र / क्रीड़ति )

(iii) बालिकाशब्दस्य चतुर्थी-विभक्तेः एववचनं................. अस्ति। (बालिका /बालिकायै )

(iv) फलशब्दस्य प्रथमा-विभक्तेः बहुवचनं................. अस्ति। (फलम् / फलानि )

(v) 'रामाय' पदे .................विभक्तिः अस्ति। (तृतीया / चतुर्थी )

(iv) रामशब्दस्य षष्ठी-विभक्तेः एववचनं................. अस्ति। (रामस्य /रामाणाम्)

प्र. 3. उचितं युग्ममेलनं कुरुत — (1×6=6)

| | |
|---|---|
| (क) यथाशक्तिः | (i) तत्पुरुषसमासः |
| (ख) राजपुरुषः | (ii) वृक्षस्योपरि |
| (ग) वृक्षस्य+ उपरि | (iii) अव्ययीभावसमासः |
| (घ) च + एकाकिनी | (iv) यणसन्धिः |
| (ङ) इत्युक्त्वा। | (v) बहुव्रीहिः |
| (च) पीताम्वरः | (iv) चैकाकिनी |

प्र. 4. एकपदेन उत्तरम् लिखत — (1×6=6)

(i) कुत्र दरिद्रता न भवेत्?

(ii) वृक्षाः स्वयं कानि न खादन्ति?

(iii) सरसाः रसालाः कदा लसन्ति

(iv)' गत्वा ' इत्यस्मिन पदे प्रत्ययः अस्ति?

(v)' अध्यापिका ' इत्यस्मिन पदे प्रत्ययः अस्ति?

(iv) 'पठितुम' इत्यस्मिन पदे प्रत्ययः अस्ति?

प्र. 5. शुद्ध वाक्यानां समसम् 'आम्' अशुद्ध वाक्यानां समक्षं न इति लिखत– (1×6=6)

(i) 'निर्धना वृद्धा' इत्यत्र निर्धना विशेषणं पदम् अस्ति।
(ii) 'खिन्नः बालः' इत्यत्र बालःविशेष्य पदम् नास्ति।
(iii) 'दानवाय' पदस्य विलोमपदं मानवाय अस्ति।
(iv) 'शरीरम्' पदस्य पर्यायपदं तनुः अस्ति।
(v) 'स्त्री' पदस्य पर्यायपदं नारी नास्ति।
(iv) 'निर्मलम् ' पदस्य विलोमपदं समलम् नास्ति।

प्र.6. परिष्कृतं पर्यावरणम् अस्मभ्यं किं किं ददाति? (2)

अथवा

निर्धनायाः वृद्धायाः दुहिता कीदृशी आसीत्?

प्र.7. बालिकया पूर्वं कीदृशः काकः न दृष्टः आसीत्? (2)

अथवा

मल्लिका चन्दनश्च मासपर्यन्तं धेनोः सेवाम् कथम् अकुरुताम्?

प्र.8. अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः? (2)

अथवा

बालः कदा क्रीडितुं अगच्छत्?

प्र.9. "जटायो! पश्य" इति का वदति? (2)

अथवा

वसन्ते किं भवति?

प्र.10. प्रकृतेः प्रमुखतत्त्वानि कानि सन्ति? (2)

अथवा

यत्नेन किं रक्षेत् वित्तं वृत्तं वा?

प्र. 11. रेखांकितपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत – ( कोऽ... ) (2)

(i) ग्रामे निर्धना स्त्रीः अवसत् ।
(iii) मोदकानि पूजानिमित्तानि रचितानि आसन्।
(iii) अजातश्शिशुः मातृगर्भे सुरक्षितः तिष्ठति।

प्र. 12. अधोलिखितानि वाक्यानि कः कं प्रति कथयति – ( कोऽपि द्वौ ) (2)

(i) तण्डुलान् मा भक्षय।
(ii) पूर्वं प्रातराशः क्रियताम्।
(iii) सिकताः जलप्रवाहे स्थास्यन्ति किम्?

प्र. 13. वाच्य-परिवर्तनम् कुरुत — ( कोऽपि द्वौ ) (2)

(i) छात्रेण हस्यते। (कर्तृवाच्य)
(ii) अहं पुस्तकं पठामि। (कर्मवाच्य)
(iii) रमा फलम् खादति (कर्मवाच्य)

प्र.14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् एकम् शुभाषितम् लिखत – (2)

प्र. 15 अधोलिखितेषु अशुद्धवाक्येषु शुद्धिम् कुरुत— ( कोऽपि द्वौ ) (2)

(i) रामः विद्यालयं गच्छन्ति
(ii) शिवं नमः
(iii) सः पठामि

प्र. 16. प्रदत्तैः शब्दैःरिक्तस्थानानिपूर्तिं कुरुत — ( कोऽपि चत्वारः) ( 1/2×4=2)

( सरसा, घटं, क्लेशात्, परेषाम्, प्रियवाक्यप्रदानेन, पर्वतात् )

(क) कुम्भकारः........ रचयति।
(ख) नद्यः.......... निस्सरन्ति।
(ग) ईश्वरः .......... त्रायते।
(घ)................. सर्वे तुष्यन्ति जन्तवः।
(ङ) आत्मनः प्रतिकूलानी.......... न समाचरेत्।
(च) वसंते लसन्तीह.......... रसालः।

प्र. 17. प्रदत्तवाक्यैः घटनाक्रमानुसारं लिखत— (1/2×4=2)

(i) तस्याः एका दुहिता विनम्रा मनोहरा चासीत्।

(ii) सूर्योदयात्प्राग् ग्रामाद् बहिः पिप्पलवृक्षमनु त्वया आगन्तव्यम्।

(iii) एकदा माता स्थाल्या तण्डुलान् निक्षिप्य पुत्रीम् आदिदेश।

(iv) पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्।

प्र. 18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- (3)

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत्-"तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते।" स्वर्णपक्षः काकः प्रोवाच, "मा शुचः। सूर्योदयात्प्राग् ग्रामाबहिः पिप्पलवृक्षमनु त्वया आगन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि।" प्रहर्षिता बालिका निद्रामपि न लेभे।

(क) कः तण्डुलमूल्यं दास्यति?

(ख) का रोदितुमारब्धा?

(ग) स्वर्णपक्षः काकःकिं प्रोवाच?

अथवा

भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतः ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः अभवन्। तन्द्रालुः बालः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानं प्राविशत्। सः अचिन्तयत्-"विरमन्तु एते वराकाः पुस्तकदासाः। अहं तु आत्मानं विनोदयिष्यामि। सम्प्रति विद्यालयं गत्वा भूयः क्रुद्धस्य उपाध्यायस्य मुखं द्रष्टुं नैव इच्छामि।

(क). बालकस्य वयस्याः किमर्थं त्वरमाणाः अभवन्?

(ख). सः किं अचिन्तयत् ?

(ग). बालः एकाकी एव कुत्र प्राविशत्?

प्र. 19. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- (3)

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।<br>
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥

(क) वित्ततः क्षीणः नरः कीदृशः भवति?

(ख) वृत्ततः क्षीणः कीदृशः भवति?

(ग) यत्नेन किं रक्षेत्?

अथवा

पिबन्ति नद्यः स्वयमेव नाम्भः<br>
स्वयं न खादन्ति फलानि वृक्षाः।<br>
नादन्ति सस्यं खलु वारिवाहाः<br>
परोपकाराय सतां विभूतयः॥

(क) सतां विभूतयः किमर्थं भवन्ति।

(ख) के स्वयमेव जलम् न पिबन्ति?

(ग) वारिवाहाः किम् न कुर्वन्ति?

**प्र. 20.** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- (3)

**पुरुषः - भोस्तपस्विन्! कथं माम् अवरोधं करोषि। प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया। तपोदत्तः - आश्चर्यम्** किम् सिकताभिरेव सेतुं करिष्यसि? सिकता जलप्रवाहे **स्थास्यन्ति किम्? भवता चिन्तितं न वा? पुरुषः - (सोत्प्रासम्)** चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानसहायतया **अधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।**

(क) पुरुषः काभिः एव सेतोः निर्माणं करोति?

(ख) केन सर्वं सिद्धम् भवति?

(ग) पुरुषः कस्मिन् न विश्वसिति?

**अथवा**

**(मल्लिका मोदकानि रचयन्ती मन्दस्वरेण शिवस्तुतिं करोति) (ततः** प्रविशति मोदकगन्धम् अनुभवन् प्रसन्नमना चन्दनः।) चन्दनः **- अहा! सुगन्धस्तु मनोहरः (विलोक्य) अये मोदकानि रच्यन्ते? (प्रसन्नः भूत्वा)** आस्वादयामि तावत्। **(मोदकं गृहीतुमिच्छति) मल्लिका - (सक्रोधम्) विरम। विरम। मा स्पृश! एतानि मोदकानि।**

(क) मल्लिका मन्दस्वरेण किं करोति ?

(ख) अहा! सुगन्धस्तु मनोहरः इति कः अवदत्-?

(ग) सुगन्धः कीदृशः अस्ति?

**प्र. 21.** अधोलिखितं अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् लिखत- (4)

**अस्माकं** देशस्य नाम 'भारतवर्षम्' इति अस्ति। पुरा अस्माकं देशे भरतनामा दुष्यन्तपुत्रः महाप्रतापी राजा बभूव। तस्य एवं **सम्बन्धात् अस्य देशस्य नाम अपि 'भारतम्' इति प्रसिद्धम्।** अस्मदीयः देशः प्रकृति-सम्पन्नः अस्ति। अत्र षड् ऋतवः यथासमयम् **आगत्य भारतं विविधाभिः सुषमाभिः भूषयन्ति। गङ्गा-यमुनाद्यनेकाः नद्यः विविधेभ्यः स्थानेभ्यः निर्गत्य अस्य पावनत्वम् आपादयन्ति। अस्य भूमिः उर्वरा अस्ति। सर्वविधम् अन्नम् अत्र उपद्यते। अस्माकं देशः विश्वगुरुः अस्ति। अयं सभ्यतायाः प्रकाशम् अन्येभ्यः देशेभ्यः दत्तवान्। 'भारतवर्षम्' अनेकेषां भाषा-वेश-धर्म-संस्कृति-परम्पराणां देशः अस्ति।**

(क) 'भारतवर्षम्' कीदृशः देशः अस्ति?

(ख) अस्माकं देशस्य नाम किम् अस्ति?

(ग) कस्य सम्बन्धाद् अस्य देशस्य नाम' भारतम्' प्रसिद्धम् अभवत्?

(घ) विश्वगुरुः कः अस्ति?

**प्र.22.** स्व प्रचार्यस्य कृते अवकाशार्थम् प्रार्थना पत्रं लिखत- (4)

अथवा

अग्रजस्य विवाहे आमंत्रयितुं स्व-मित्रं प्रति पत्रं लिखत -

**प्र. 23.** अधोलिखितेषु एकं विषयं स्वीकृत्य विंशत्यधिक-शतशब्देषु (120) संस्कृत भाषायां निबंधं लिखत - (4)

(क) संस्कृतभाषायाः महत्वम्

(ख) पर्यावरणम्

(ग) मम प्रियकविः

(घ) अस्माकं भारत-देश